स्येश्वरसमानधर्म्मत्वं नास्त्येव न नास्तीति, विद्यमानमपि तु तत् तिरोहितं, अविद्यादिव्यवधानात्। तत् पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दृक्शक्तिरौषधवीर्य्यादीश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत एव सर्व्वेषां जन्तूनां, कुतस्ततो हि ईश्वराद्धेतोरस्य जीवस्य बन्धमोक्षौ भवतः, ईश्वरस्य स्वरूपापरिज्ञानाद् बन्धः तत्स्वरूपपरिज्ञानात्तु मोक्षः। तथा च श्रुतिः "ज्ञात्वा देवं सर्व्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः"। तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्य्यं केवल आप्तकामः" इत्येवमाद्या" भा०। "देहयोगाद् वा सोऽपि" सू०। "कस्मात् पुनर्जीवः परमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्य्यो भवति युक्तन्तु ज्ञानैश्वर्य्ययोरतिरस्कृतत्वं विस्फुलिङ्गस्येव दहनप्रकाशयोरिति। उच्यते सत्यमेवैतत्, सोऽपि तु जीवस्य ज्ञानैश्वर्य्यतिरोभावो देहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति। अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसम्पन्नस्याप्यरणिगतस्य दहनप्रकाशने तिरोभवतः, यथा वा भस्मच्छन्नस्य, एवमविद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्य्यतिरोभावः। वाशब्दो जीवेश्वरयोरन्यत्वाशङ्काव्यावृत्त्यर्थः। नन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्य्यत्वात् किं देहयोगकल्पनया। नेत्युच्यते, न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते "सेयं देवतैक्षत" इत्युपक्रम्य "अनेन जीवेनात्मनानुप्रविश्य" इत्यात्मशब्देन जीवस्य परामर्शात्। "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति च जीवस्योपदिशतीश्वरात्मत्वम्, अतोऽनन्य एवेश्वरात् जीवः सन् देहयोगात् तिरोहितज्ञानैश्वर्य्यो भवति, अतश्च न साङ्कल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते। यदि च साङ्कल्पिकी स्वप्ने सृष्टिः स्यात् नैवानिष्टं कश्चित् स्वप्नं पश्येत्। न हि कश्चिदनिष्टं सङ्कल्पयते। यत् पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्, जागरितप्रभववासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत्। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्"।

स्वप्नभेदस्य शुभाशुभसूचकत्वं नानापुराणेषूक्तं तत्र दिङ्मात्रं मत्स्यपुराणे २४२ अध्याये उक्तमत्र प्रदर्श्यते यथा "इदानीं कथयिष्यामि निमित्तं स्वप्नदर्शने। नाभिं विनान्यगात्रेषु तृणवृक्षसमुद्भवः। चूर्णनं मूर्ध्नि कांस्यानां मुण्डनं नग्नता तथा। मलिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता। उच्चात् प्रपतनञ्चैव दोलारोहणमेव च। अर्ज्जनं पङ्कलोहानां हयानामपि मारणम्। रक्तपुष्पद्रुमाणाञ्च मण्डलस्य तथैव च। वराहर्क्षखरोष्ट्राणां तथा चारोहणक्रिया। भक्षणं पक्वमांसानां तैलस्य कृसरस्य च। नर्त्तनं हसनञ्चैव विवाहो गीतमेव च। तन्त्रीवाद्यविहीनानां वाद्यानामभिवादनम्। स्रोतोऽवगाहगमनं स्नानं गोमयवारिणा। पङ्कोदकेन च तथा महीतोयेन चाप्यथ। मातुः प्रवेशो जठरे चितारोहणमेव च। शक्रध्वजाभिपतनं पतनं शशिसूर्य्ययोः। दिव्यान्तरिक्षभौमानामुत्पातानाञ्च दर्शनम्। देवद्विजातिभूपालगुरूणां क्रोध एव च। आलिङ्गनं कुमारीणां पुरुषाणाञ्च मैथुनम्। हानिश्चैव स्वगात्राणां विरेकवमनक्रिया। दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा। फलापहानिश्च तथा पुष्पहानिस्तथैव च। गृहाणाञ्चैव पातश्च गृहसम्मार्ज्जनन्तथा। क्रीडा पिशाचक्रव्यादवानरर्क्षनरैरपि। परादभिभवश्चैव तस्माच्च व्यसनोद्भवः। काषायवस्त्रधारित्वं तद्वत् स्त्रीक्रीडनन्तथा। स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम्। एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत्। एषां सङ्कथनं धन्यं भूयः प्रस्वपनं तथा। कल्कस्नानं तिलैर्होमो ब्राह्मणानाञ्च पूजनम्। स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम्। नागेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम्। स्वप्नास्तु प्रथमे यामे संवत्सरविपाकिनः। षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्तृतीयके। चतुर्थे मासमात्रेण पश्यतो नात्र संशयः। अरुणोदयवेलायां दशाहेन फलं भवेत्। एकस्यां यदि वा रात्रौ शुभं वा यदि वाशुभम्। पश्चाद्दृष्टस्तु यस्तत्र तस्य पाकं विनिर्दिशेत्। तस्माच्छोभनके स्वप्ने पश्चात् स्वप्नं न पश्यति। शैलप्रासादनागाश्ववृषभारोहणं हितम्। द्रुमाणां श्वेतपुष्पाणां गमने च तथा द्विज!। द्रुमतृणोद्भवो नाभौ तथैव बहुबाहुता। तथैव बहुशीर्षत्वं फलितोद्भव एव च। सुशुक्लमाल्यधारित्वं सुशुक्लाम्बरधारिता। चन्द्रार्कताराग्रहणं परिमार्ज्जनमेव च। शक्रध्वजालिङ्गनञ्च तदुच्छ्रायक्रिया तथा। भूम्यम्बुधीनां ग्रसनं शत्रूणाञ्च